शोशुचानो विश्वाद्वेषाथ्सिप्रमुमुग्ध्यस्मस्वाहा इदं मग्नि
वरुणाभ्यां॥१॥ॐसत्वन्नो ग्नेवमोभवेनी॥नेदिष्ठो असा
उषसो व्युष्टो॥ अवयक्ष्मो वरुणथ्वं॥ रराणोवीहिमृडीक
थ्वं॥हवोनराधि स्वाहा इदं मग्निवरुणाभ्यां २ ॐअयाश्चाग्न
स्यनभिशस्तिपाश्चसत्वमित्तमया असिअयानो धेहि भेष
जथ्वं स्वाहा॥इदं मग्नये ३ ॐयेत्ते शतं वरुणं ये सहस्रं यत्ति
पापाशावितते महांतस्तेभिर्मो अद्यसवितोत विष्णुर्विश्वे
मुंचंतुमेरुतः स्वर्कायस्वाहा इदं वरुणाय सवित्रे विष्णवे
विश्वेभ्यो देवेभ्यो मरुभ्यः स्वर्केभ्यः ॐउदुत्तमं वरुणपाशम
स्मदवाधमं॥विमध्यमथ्वं श्रथाय॥पथावयमादित्यव्रते
तवानागसो॥अदितयस्याम स्वाहा॥इदं वरुणायदित्या
यं॥इतिसर्वपापप्रशिनसंज्ञका॥ॐगणपत्तयेस्वाहा इदं ग
णपत्तये॥ॐब्रह्मणेस्वाहा इदं ब्रह्मणे॥ॐविष्णवेस्वाहा इदं
विष्णवे॥ॐशंभवे स्वाहा इदं शंभवे॥ॐलक्ष्म्यैस्वाहा इदं ल
क्ष्म्यै॥ॐसरस्वत्यैस्वाहा इदं सरस्वत्यै ॐभूम्यैस्वाहा इदं भू
म्यै॥ॐसूर्यायस्वाहा इदं सूर्याय॥ॐचंद्रमसे स्वाहा इदं चंद्र
मसे॥ॐभौमायस्वाहा इदं भौमाय॥ॐबुधायस्वाहा इदं बु

धाय॥ॐबृहस्पतयेस्वाहा॥इदंबृहस्पते॥ॐशुक्रायस्वाहा॥इदंशुक्रायः॥ॐशनैश्चरायस्वाहा॥इदंशनैश्चराय॥ॐराहवेस्वाहा॥इदंराहवे॥ॐकेतवेस्वाहा॥इदंकेतवे॥ॐउग्रायस्वाहा॥इदमुग्राय॥ॐभीमायस्वाहा॥इदंभीमाय॥ॐज्येष्ठैस्वाहा॥इदंज्येष्ठै॥ॐवरुणायस्वाहा॥इदंवरुणाय॥ॐकृतध्वंसवेस्वाहा॥इदंकृतध्वंसवे॥ॐप्रजापतयेस्वाहा॥इदंप्रजापतये॥ॐअग्नयेस्विष्टकृतेस्वाहा॥इदमग्नयेस्विष्टकृते॥ॐइंद्रायस्वाहा॥इदमिंद्राय॥ॐभूःस्वाहा॥इदंभूः॥ॐभुवःस्वाहा॥इदंभुवः॥ॐस्वःस्वाहा॥इदंस्वः॥एताप्रायश्चित्तसंज्ञका॥अथपूर्णाहुतिध्यान॥ॐमूर्द्धानंदिवोअरतिं॥पृथिव्यावैश्वानरमृतआजात॥मग्निंकविंसम्राजमतिथिंजनानामासन्नापात्रं॥जनयंतिदेवाः॥पूर्णादर्विपरापतेति॥पुनस्त्वादित्येतियजमानस्य॥कामाःसम्यासंतुस्वाहा॥इदमग्नये॥इतिपूर्णाहुति॥अथविसर्जन॥ग्रहागावोनरेंद्राश्च॥ब्राह्मणविशेषतः॥पूज्यंताप्रतिपूज्यंते॥सावधानंभवंतुते॥१॥गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर॥यत्रब्रह्मादयोदेवाःतत्रगच्छहुताशने॥२॥आगतास्तुयथान्यायं॥पूजीतास्तुयथाक्रमं॥कृत्वामपिकृपांदेवाः॥यत्रस्तातत्रगच्छत॥३॥यजमानहितार्थाय॥पुनरागमनायच॥सत्रूणांवुधिनाशाय॥मित्राणामुदयाय

च॥ यथासास्त्रप्रहाराणां॥ कवचेवारुणंभवेत्॥ तत्रदेवो
पघामानां॥ शांतिर्भवतिवाहणां॥५॥ ॐ अग्निमीलेपुरोहि
तं॥ यज्ञस्यदेवमृत्विजंहोतारंरत्नधातमइतिहोमशांतिसं
पूर्णम्॥ ॥ ॥ ॥ श्रीगणेशायनमः॥ अथबौ
धायनोक्तलिंगप्रतिष्ठापनविधिः॥ तत्रादौकालः विष्णुधर्मो
त्तरेचैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथामाघेवासर्वदेवा
नांप्रतिष्ठासुभदाासितेतरिक्तान्यतिथिषुमासस्याद्वारेभौमान्यके
तथामाधवोवैसाखः॥ माघोत्रशिवादिप्रतिष्ठापरः विष्णुप्रतिष्ठा
तुमाघेनभवतिमाघेकर्तुर्विनाशःस्यात्फाल्गुनेशुभदासिते
इतिविष्णुप्रतिष्ठाप्रकरणेउक्तत्वादितिहेमाद्रिः॥ मार्गशीर्षेहरं
चैवआश्विनेजगदंबिकांमाधवेस्थापयेद्विष्णुंसर्वान्पौषेपि
केचनेतिमूहूर्तगणपतौचतुर्थ्यांमष्टम्यामपभरण्यांवायामा
निशुभनक्षत्राणीतिबौधायनंसूत्रंशौनकेपिसितेशुक्लपक्षे
इतिकेचित्॥ त्रिविक्रमस्तुकृष्णपक्षेत्रिभागेतुप्रथमेस्या
च्छुभावहः मध्याद्वितीयभागेतुतृतीयकार्हनाशिनी॥ शुक्लेत्रि
भागेप्रथमेदेशनाशप्रकीर्तिता॥ द्वितीयमध्यफलदात्तृतीये
तुशुभावहेति॥ विष्णुधर्मोत्तरात् सितेसनेनदुष्टचंद्रास्तिथ
यउच्यंतेनशुक्लपक्षइसाह॥ अयनस्त्राण्युक्तानितत्रैवमा
त्सेनआषाढेद्वेतथामूलउत्तरात्रयमेवच॥ ज्येष्ठाश्रवणरोहि

एषः पूर्वाभाद्रपदा तथा॥ हस्ताश्विनी रेवती च पुष्यो मृगशिरस्तथा॥ अनुराधा तथा स्वाती प्रतिष्ठासु प्रशस्यते इति। नृसिंहपुराणेपि तथा महाश्विनो मास उत्तमः सर्वकामदः। देवस्तत्र सदा शक्रः पांसुनापि प्रतिष्ठितः भवेत्फलदः पुंसां कर्कस्थे च दिवाकरे। न तिथिर्न च नक्षत्रं नोपवासोत्र कारणं॥ मातृभैरववाराहनारसिंहत्रिविक्रमाः महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने मातृभैरव इत्यत्र देवभैरववाराह इत्यपि पाठो वर्त्तते॥ तत्र देवशब्देन महादेवः भैरवपदसमानाधिकरण्यात्। इति कालः लिंगस्य स्थापने तु गंगातीरे विशेषतः। शिवालये पुण्यदेशे अलाभे कूपहंतिघौ। काश्यां तु कोटिगुणितं शिवस्थापनजं फलं। न स्पृंतिनाल्पभोगेन नैव कार्यं गृहांतरे इति समुच्चये। एवमः ग्रहस्थेन सदा कार्यं पंचायतनपूजनं। तथैव स्थापनं कुर्यादन्यथा विफलं भवेत्॥ ग्रंथांतरे तु लिंगं गृही लापतिपदं परमहंसातिरिक्तपरं। तस्य कर्मस्वनधिकारात् तद्वत्वा च यतिर्वापि स्थापयेत् प्रतिमां तथा॥ शूद्राणामनधिकारोस्ति विष्णोर्वा शंकरस्य वा। न शूद्रस्थापितं लिंगं ब्राह्मणो न तु पूजयेत्। अन्यथा धर्महानिः स्याद्भवेदेव न संशयः। रुद्रयामलेपि। अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके इति। शूद्रः पौराण धर्मेषु वर्णेला द्धर्ममर्हति। चापूर्त्ते धर्मे वापीकूपतडागादिसंकरजातीनां वर्णेलाभावेन पूर्त्ते धर्म

नधिकारः।पूर्त्तेधर्मेद्विजस्त्रीणांब्राह्मणाःप्रतिहस्तकः।भवेदे
वतत्सर्वत्रनशूद्राणांकदाचन।शूद्राणांद्रव्यदानेनतत्तत्फ
लमवाप्नुयात्।अन्यथानरकेघोरेयतत्येवनसंशयः।मत्तोदृशे
नकर्त्तव्यंलिंगस्थापनमुत्तमं वापीकूपतडागादिअन्नदाना
दिकंतथा दशहस्तप्रमाणेनशिवस्थापनदेशनः शिवक्षेत्रं
विजानीयान्नग्नाद्यंतत्रकिंचनकाश्यपांनुसर्वकालेषुलिंगा
स्थापनमुत्तमं कर्त्तव्यंचप्रयत्नेनमोक्षार्दीन्नविचारयेदिति
चंद्रानुकूलेऽशकादिशुभतिथौपूर्वेद्युःपूर्वोर्हेब्राह्मणानाहू
यमासपक्षाद्युल्लिख्यममशाश्वतब्रह्मलोककामनयाश्री
परमेश्वरप्रीत्यर्थंमप्रसादंलिंगप्रतिष्ठांकरिष्ये।अक्षय्यसुख
कामोवाकायकादिसमस्तपापक्षयार्थंवाईश्वरप्रीतिकामो
वाइतिसंकल्प्यगणेशपूजनपुण्याहवाचनादिनांदीश्राद्धंकृ
त्वाचार्यंवृत्वाप्रार्थनांकुर्यात्।मंत्रमूर्तिर्भवान्नायसंसारच्छेद
कारकदेवःपूजार्हेयथासान्नरुधर्मोन्नतिंचनःसंसारभय
भीतेनअयंयज्ञःकृभक्तितः।प्रारब्धस्तत्प्रसादेननिर्विघ्नंमेभ
वत्विति।ततोब्रह्मसदस्यौवृणुयात्।सदस्यादीवरणमितिप्रति
ष्ठाहेमाद्रिः।चत्वारोष्टौवाऋत्विजोवृणुयात्।तेषांवस्त्रादिभिः
पूजनंकुर्यात्।मधुपर्कोथवाकुर्यान्नकुर्यात्स्मार्त्तकर्मणि।चा
दित्तंवरणंयत्रभवेत्तत्रैवसर्वथेति।ततआचार्यःयजमानद्वेतो

हमाचार्यकर्मकरिष्ये। सर्वपान्विकीर्ययदत्रसंस्थितंभूतस्थान
माश्रितसर्वेषांस्थानंलब्ध्वा तत्सर्वेयत्रस्थितत्रगच्छतु। अप
क्रामंतुभूतानिपिशाचाःसर्वतोदिशं। सर्वेषामविरोधेनब्रह्मक
र्मसमारभे। ततःपंचगव्येनप्रोक्षणं। शुचीवोहव्यामरुतःशुची
नांशुचिंहिनोम्यध्वरंशुचिभ्यः। ऋतेनसत्यमृतसापआयंछु
चिजन्मानःशुचयःपावकाः। अग्निःशुचिव्रततमःशुचिर्वि
प्रःशुचिःकविः। शुचीरोचतआहुतः उदग्नेशुचयस्तवशुक्रा
भ्राजंतईरते। तवज्योतींष्यर्चयः ततः आपोहिष्ठेतितिसृभिः
शुद्धोदकेनप्रोक्ष्य। स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंमहद्भूतंवाय
संदेवतानां। असुरघ्नमिंद्रसखंसमत्सुबृहद्यशोनावमिवारु
हेमा। अहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंमनसाचतार्क्ष्यप्रय
तपाणिःशरणंप्रपद्ये। इतिसंबाधेषुभयंन्नो। अस्तुदेवा। आ
यांतुयातुधाना अप आयांतुविष्णोदेवयजनंरक्षस्वभूमौप्रा
देशंकुर्यात्। नूतनप्रसादस्तत्वेशंकरोपणादि। ततो आचार्यः
निशायांपंचगव्येनहिरण्यदूर्वांकुरयवाश्वत्थपलाशप
र्णमिश्रोदकेनलिंगमभिषिंच्य। आपोहिष्ठा० ऋक्३। हिरण्य
वर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः। अग्निंयाग
र्भंदधिरेविरूपास्तानआपःशंस्योनाभवंतु। यासांराजावरुणो
यातिमध्येसत्यानृतेअवपश्यंजनानां। मधुश्चुतःशुचयोयाः

पावकास्तान॰।यासांदेवादिविक्षुएवंतिभक्षंयाअंतरिक्षेव
हुधाभवंति।याःपृथिवींपयसोंदंतिशुक्रास्तान॰।शिवेनमा
चक्षुषापश्यतापःशिवयातन्वोपंस्पृशतत्वचंमोसर्वी॰ऽअ
ग्निंऽऽप्सुषदोहुवोमयिवर्चोवलमोजोनिधत्तपवमानःस्व
र्जनःपवित्रेणविचर्षणिःायेःपोतासपुनातुमापुनंतुमादे
वजानाःपुनंतुमनवोधिया।पुनंतुविश्वआयवःजातवेदः
पवित्रंवत्।पवित्रेणपुनाहिमा।शुक्रेणदेवदीद्यत्।अग्ने
क्रत्वाक्रतूंऽऽरनुयत्तेपवित्रमर्चिषि।अग्नेवित्तमंतेणब्रह्मते
नपुनीमहोउभाभ्यांदेवसवितःपवित्रेणपुनाहिमाशुक्रे
णदेवदीद्यत्।अ)सवेनच।इदंब्रह्मपुनीमहेविश्वेदेवीप
नतीदेव्यागात्।यस्यैवहूत्तनुवोवीतपृष्ठाःतयामदंतःसध
माद्येषुवयंऽस्यामपतयोरयीणां।वैश्वानरोरश्मिभिर्मा
पुनातुवातःप्राणेनेषिरोमयोभूः।द्यावापृथिवीपयसाप
योभिः।ऋतावरीयज्ञियेमापुनीतां।बृहद्भिःसवितस्तृभिः
वर्षिष्ठेदेवमन्मभिः।अग्नेदक्षैःपुनाहिमा।येनदेवाअ
पुनत।येनापोदिव्यंकशः।तेनदिव्येनब्रह्मणा।इदंब्रह्मपु
नीमहेयःपावमानीरध्येतिऋषिभिःसंभृतंऽऽरसंसर्वंऽस
पूतमश्नाति।स्वदितंमातरिश्वना।पावमानीर्योऋध्येति
ऋषिभिःसंभृतंऽऽरसं।तस्मैसरस्वतीदुहेक्षीरंऽसर्पिर्मधूद

कोपावमानीः स्वस्त्ययनीः सुदुघाहिपयस्वतीः ऋषिभिः संभृतोरसः ब्राह्मणेष्वमृतं हितं पावमानीर्दिशंतुनः इमंलोकमथो अमुं कामांत्समर्धयंतुनः देवीर्देवैः समाभृताः पावमानीः स्वस्त्ययनीः सुदुघाहि घृतश्चुतः ऋषिभिः संभृतोरसः ब्राह्मणेष्वमृतं हितं येनदेवाः पवित्रेण आत्मानंपुनतेसदा तेनसहस्रधारेण पावमान्यः पुनंतु मा प्राजापत्यंपवित्रं शतोद्यामं हिरण्मयं तेनब्रह्मविदोवयं पूतंब्रह्मपुनीमहे इंद्रः सुनीतिसहमापुनातु सोमः स्वस्त्यावरुणः समीच्या यमोराजाप्रमृणाभिः पुनातमाजातवेदामोर्जयंत्या पुनातु भूर्भुवः स्वः ततो पुष्पफलयवाक्षतदूर्वीकुर्यानुगृहीत्वा पादपीठेनमस्ते रुद्रमन्यव तेनमः इतिनिक्षिप्य लिंगंस्थापयित्वा रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रतिष्ठमुपयामिशर्मशिशानो अग्निः ऋतुभिः समिधः सनोदिवासरिषः पातुनक्तंमितिप्रतिसरंबध्वासंपूज्यावासमाकुशैश्चाच्छाद्य अवतेहेडोवरुणनमोभिरवयज्ञेभिरीमहे हविर्भिः क्षयन्नस्मभ्यमसुरप्रचेतो राजन्नेनांसिशिश्रथः कृतानि उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय अथावयमादित्यव्रतेतवानागसो अदितयेस्यामेतिद्वाभ्यांजलेधिवासयति सद्यः पक्षेगोदोहनकालपर्यंतंजलाधिवासः

ततःश्वोभूतेस्थंडिलदेशततःप्रागीशान्यांवाहस्तमात्रांतराले
नलिंगत्तोभद्रमंडलंविरच्येतेषुब्रह्मादीनावाह्यसंपूज्यमंड
लतःप्रागादिदिक्षुकलशद्वयंसंस्थाप्यपंचपल्लवादीन्निक्षि
प्याउत्तिष्ठब्रह्मणस्पस्पतेदेवाःसंतेस्त्वेमहेउपप्रयंतुमरुतः
रुद्रानेवइंद्रप्रस्थूर्भवास्यचांइतिऋत्विजोलिंगमुत्थापयेयुः।
लिंगंद्विविधमुक्तंपार्थिवगणपते।सखंडंस्थावरंलिंगंख
डंजंगमंभवेत्।पंचसूत्रप्रमाणेनकुर्याल्लिंगंतुजंगमंस्थावरं
वास्यैवस्यात्पार्थिवंतुमनोरमिति।ततोवोध्यायनोक्तकर्मणः
पुण्याहस्वस्तिऋद्धिंश्रीःकल्याणंचवाचयित्वाभ्यागतंदेवंदे
वशविरूपनमोस्तुते।शुद्धेपित्वर्धस्थानेशुद्धिंकर्मसहस्र
नामितिसंप्रार्थ्यवल्मीकमृत्कषायानलिप्यकुर्वस्थापिते
रष्टभिःकलशोदकैःस्नापयेदिति।शुद्धोदकेनस्नापयेत्।क्षी
रदधिघृतानांपलानि।गायत्र्यागोमूत्रं।गंधद्वारामितिगोमयं
आप्यायस्वेतिक्षीरंदधिक्राव्णइतिदधिशुक्रमसीतिघृतं
देवस्यत्वेतिकुशोदकंप्रणवेनालोडनंयज्ञियकाष्ठेनप्रणवे
नाभिमंत्र्याततःपंचगव्येनमस्तेरुद्रमन्यवइत्यष्टभिः॥
स्नापयित्वा।शमीपलाशखदिरबिल्वाश्वत्थवैकंकतन्यग्रो
धपनसाम्रशिरीषोदुंबरप्लक्षाणांत्वक्कषायंकलशोदकेन।
भिषिंचति।अश्वत्थेवोनिषदनंपर्णेवोवसतिःकृतागोभा

जइतिकिलासथयत्सनवथपूरुषमितिमणिमुक्ताप्रवाला॰
कस्फवर्णोदकेनाभिषिंचति हिरण्यावर्णामितिचतसृभिः
कलशोदकेनाभिषिंच्याग्निःसप्तिमितिलोहधातोनारण्या
रथकेचिद्धाकुःइदमनुत्तारणं धातुलिंगानांप्रतिमायांचनिय
मेनभवति।नरत्नलिंगादौतथा।रत्नजेशैलजेलिंगेपार्थिवेपार
देपिच।फाटिकाणलिंगेतुनचास्तुत्तारणक्रिया।तापरंकोभय
सलेसर्वत्रभवति।शालग्रामशिलायांतुनित्यःसन्निहितोहरिः
वाणलिंगेस्वयंभूतेनित्यःसंनिहितःशिवः।चलाचलप्रतिष्ठा
तुसर्वथानत्तयोर्भवेत्।जंगमंवाणलिंगंस्यात्शैलजंस्थावर
तंतथा।प्रादेशादधिकंलिंगंग्रहेनैवप्रपूजयेत्रुद्राक्षंवाणलिं
गचस्थूलंप्रशस्यते।शालग्रामशिलाचक्रंसूक्ष्मात्सूक्ष्मंप्रपूज
येत्।वाणलिंगस्थापनेआचारएवमूलं।लिंगंपीठांतरेनिवेश्य।
अभिवस्त्राक्षवसनान्यर्थोभिधेनूःसुदुघाःपूयमानःअभिचं
द्राभर्त्तवेनोहिरण्याभ्यश्वान्नथिनोदेवसोमेतिवस्त्रयुग्मंगंधा
क्षतपुष्पधूपदीपनैवेद्यैःसंपूज्य।आचार्यस्तैजसपात्रस्थमधु
सुवर्णशलाकयागृहीत्वातेननेत्रोन्मीलनंकुर्यात्।सर्वत्रलिंगे
नषुनभवतिचक्षुषोरभावात्।अत्रवोधायनःलिंगंचिन्निर्वर्त्तने
चक्षुषोभावादिति।सामान्योयंनिषेधः।अनेनवाणलिंगस्था
पनमर्थेतःप्रमाणमूलंभवति।मूर्त्तिःसावयवाज्ञेया।लिंगंचिनि
रवयवंभवेत्।चक्रचिन्हांकितेनैवशालग्रामस्तुनान्यथा।ग्र
थांतरेत्तुलिंगंपीठाद्विगुणितंमुखंकुर्यात्त्रिगुणंहस्तमात्रंवेति॥

त्छं गौउसंप्रदायः नत्रोन्मीलनसमयेआदौदध्योदनं भूरुषा
हारपरिमितं पञ्चपूलिकान्नयुक्तं वलिं प्रदद्यद्वेवस्यो रिस्तुविदि
सुहिरण्यगर्भेद्दूसष्टभिर्दीपानूपियमयान्प्रदर्श्यदेवस्यासमं
ताद्यथाशक्ति घृतदीपान्प्रज्वाल्यन्नेत्रोन्मीलनं कार्यं। हिरण्य
गर्भः समवर्त्तताग्रेभूतस्यजा तः पतिरेक आसीत्। सदाधार
थिवीं द्यामुतेमां कस्मैदेवाय हविषा विधेम यः प्राणतो निमिष
तो महित्वैक इद्राजा जगतो वभूव। यई शेअस्यद्विपदश्चतुष्पदः
कस्मै ॥ य आत्मदा वलदा यस्य विश्वउपासते प्रशिषं यस्यदेवाः
यस्यच्छायामृतंयस्यमृत्युः कस्मै०। यस्येमहिमवंतो महित्वायस्य
समुद्रं रसया सहाहुः। यस्येमाः प्रदिशा यस्य वाहू कस्मै०। यंक्रं
दसी अवसानस्तभाने अभ्येक्षेतां मनसारेजमानोयत्राधिसूरउ
दितो व्येति कस्मै०। येनद्यौरुग्रा पृथिवीचदृढा येनः स्वस्तभितं
येननाकः। यो अंतरिक्षे रजसो विमानः कस्मै०। आपोहयन्मह
तीर्विश्वमायान्दक्षंदधाना जनयंतीरग्निं। ततो देवानां निरवर्त
तासुरेकः कस्मै०॥ यश्चिदापो महिना पर्यपश्यद्दक्षंदधानाज
नयंतीरग्निं यो देवेष्वधिदेवएक आसीत्कस्मै०। इत्य
ष्टभिर्मंत्रैः। पश्चात्स्वर्णशलाकया चित्रं देवानामुदगादनीकं
चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्राद्यावापृथिवी अंतरिक्षं नस्मिं
नात्मा जगतस्तस्थुषश्च इति स्वयं दक्षिणपार्श्वे स्थित्वा सत्तूर्यघोषं
एकैकं नेत्रं सम्यगुन्मीलयेत्। तदानकश्चित्पुरतस्तिष्ठेत्। ॐ
नमो भगवते रुद्राय हिरण्यरेतसे परायपरमात्मने विश्वरूपायउ

माप्रियायपनमइतिमंलिख। अंजंतित्वामध्वरेदेवयंतोवनस्पतेम
धुनादैव्येनायदूर्ध्वेतिष्ठाद्रविणेहधत्तायद्वाक्षयोमातुरस्याउपस्थे
इतिमध्वंजनंकुर्यात्। आचार्यायधेनुंदद्यात्। ततोदेवमुत्थाप्यकु
शप्रस्तरेसुश्लक्ष्णवस्त्रेणाच्छाद्यप्राक्शिरसंदेवंशाययेत्। शिलिनेश
लाकांदद्यादितित्रिविक्रमपद्धतौलिंगतोभद्रात्पुरतःशय्यायांस्था
पयेद्विवं। अथवालिंगतोभद्रेशाययेत्स्वाङ्गुलंवप्रभुं। प्राजापत्यंमु
हूर्तोरुद्रस्तत्कालतत्आचार्यःस्थंडिलाद्यग्निप्रतिष्ठांतंकृत्वा। अ
त्रवलवर्द्धननामाग्निप्रतिष्ठाप्याग्निंध्यात्वा। क्रियमाणेलिंगप्रति
ष्ठाहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये। अस्मिन्नन्वाहिते।
ग्नाविसादिचक्षुषीआज्येनेसंतमुक्त्वा। अत्रप्रधानंग्रहपक्षेग्र
हाणांअन्वाधानंकृत्वाततःप्रधानंश्रीरुद्रंषट्पंचाशदधिकश
तसंख्याकाभिः। आज्याहुतिभिः। पुनरत्रप्रधानं। भवादिअष्ट
देवताःप्रत्येकंएकैकाभिस्तिलोदनाहुतिभिःपुनरत्र। भवस्यदे
वस्यपत्न्याद्यष्टदेवताः। प्रत्येकंएकैकाभिर्गुडोदनाहुतिभिःपुन
रत्र। भवस्यदेवस्यसुताद्यष्टदेवताःप्रत्येकंएकैकाभिःहरिद्रोद
नाहुतिभिः। पुनरत्र। रुद्रंअष्टादशसंख्याकाभिःओदनत्रयमि
श्रिताहुतिभिःब्रह्मा। दिलिंगतोभद्रदेवताःएकैकयाज्याहुति
भिः। शेषेणेत्यादिआज्यभागांतंकृत्वाप्रधानहोमंकुर्यात्। प्रति
होमंत्यागः। अनेककर्तृत्विकुकर्तृकत्वाभावात्। यातइषुःशिवतमे
त्याद्यनुवाकशेषणाद्रापेअंधसस्पतेसहस्राणिसहस्रशइत्यनुवाका
भ्यांचप्रतिमंत्रमाज्येनहुत्वा। ततःसर्वोवैरुद्रस्तस्मैरुद्रायनमोअस्तु

पुरुषोवैरुद्रः सन्महोनमोनमः॥ इतिलिंगस्यमूलदेशंस्पृशे
त्।पूर्ववत्पुनस्ताभिर्हुत्वा॥ कद्रुद्रायप्रचेतसेमीढुष्टमायत
व्यसे॥वोचेमशंतमंहृदे इतिलिंगस्यमध्यंस्पृशेत्।पूर्ववत्पु
नस्ताभिर्हुत्वानमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमोन
मः इत्यग्रंस्पृशेत्।पूर्ववत्पुनस्ताभिर्हुत्वा।संपूर्णोहद्रेणास
र्वांगंस्पृशेत्।अत्रपुनस्ताभिर्हुत्वेतिबौधायनसूत्रेपुनःश
ब्दश्रवणात्समानकर्तृकभिन्नकालिकक्रमेणप्रयोगः॥
नभिन्नकसमानकालिकप्रयोगः॥ ततःउदुत्यंजातवेदसं
देवंवहंतिकेतवः॥दृशेविश्वायसूर्यं॥ इतिदेवमुत्थाप्य
सद्योजातमितिपंचानुषाकैर्देवालयंप्रविश्य।सदाशिवोभि
लंतैर्मंत्रैरित्यर्थः।तत्रमणिमुक्ताप्रवालस्वर्णरजतान्यगर्त
मध्येस्थापयित्वानमस्तेरुद्रमन्यवइतिलिंगंस्थापयेत्।प्रा
ङ्मुखींप्रतिमांस्थाप्य विष्णोर्वाशंकरस्यवालिंगंचोदङ्मुख्या
र्घ्यंप्राङ्मुखंवेतिकेचनेति। अथगंधादीन्याकाशोमुखानि
कुर्यादितिसूत्रंबौधायनस्य। अस्यार्थः।आकाशपदोपलक्षि
तपूज्यप्रतिमालिंगंवा।पुरोभागस्थानिगंधादीनिअंतरिक्षस्था
निऊर्ध्वमुखानीतिकेचित्।उपोत्थायावाहनंकरोति।ॐभूःपु
रुषमावाहयामि।ॐभुवःपुरुषमावाहयामि।ॐस्वःपुरुष
मावाहयामिॐभूर्भुवःपुरुषमावाहयामि।ततोदेवंस्पृष्ट्वाइ
हैवैधिमाव्यधिष्ठाः पर्वतइवाविचाचलिः इंद्रइवेहध्रुवंध्रु
वस्तिष्ठ इहराष्ट्रमधारय। अभितिष्ठप्टतन्यतः।अधरेसंतुश

त्रवः। इंद्र इव वृत्रहा तिष्ठ। अपक्षेत्राणि संजयन्। इंद्र एनम
दीधरत्। ध्रुवं ध्रुवेण हविषा तस्मै देवा अधिब्रवन्। अयं च ब्र
ह्मणस्पतिः। इति जपित्वा प्रणवेन कृतांगन्यासः। प्राणप्रतिष्ठां
कुर्यात्। अस्य श्री प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋ
षयः। ऋग्यजुःसामाथर्वाणि छंदांसि। क्रियमयवपुः प्राणाख्या
देवता। आं बीजं। क्रों कीलकं। ह्रीं सोः शक्तिः। प्राणप्रतिष्ठापने वि०
ततो भूतशुद्धिं कृत्वा। ॐ अं कं खं गं घं ङं आं पृथिव्यप्तेजोवाय्वा
काशात्मने अंगुष्ठाभ्यां नमः। ॐ इं चं छं जं झं ञं ईं शब्दस्पर्शरू
परसगंधात्मने तर्जनीभ्यां नमः। ॐ उं टं ठं डं ढं णं ऊं श्रोत्रत्वक्च
क्षुर्जिह्वाघ्राणात्मने मध्यमाभ्यां नमः। ॐ एं तं थं दं धं नं ऐं वा
क्पाणिपादपायूपस्थात्मने अनामिकाभ्यां नमः। ॐ ओं पं फं बं
भं मं औं वचनागमनविसर्गानंदात्मने करतलकरपृष्ठाभ्यां न
मः। एवं हृदयादि। अथ ध्यानं। रक्तांभोधिस्थपोतोल्लसदरुण
सरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षूद्भवमथ गुणमप्य
ंकुशं पंच बाणान्। बिभ्राणासृक्कपालं त्रिनयनलसिता
पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राण
शक्तिः परा नः। इति ध्यात्वा जपेत्। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं
हं लं क्षं हंसः देवस्य प्राण इह प्राणाः। ॐ आं ह्रीं क्रीं यं रं लं वं शं षं
सं हं लं क्षं हं सः देवस्य जीव इह स्थितः। ॐ आं ह्रीं क्रों यं रं लं वं शं
षं सं हं लं क्षं हंसः देवस्य सर्वेंद्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वा
घ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा। अस्यैः प्राणाः प्र

तिष्ठंतु। असै प्राणाः क्षरंतु। असै देवत्वमर्चायै स्वाहा। इति प्राण
प्रतिष्ठां कृत्वा। ततो यजमानः लिंगस्य दक्षिणे कर्णे रुद्रगायत्रीं
जपेत्। स्वागतं देव देवेश मद्भाग्यात्त्वमिहागतः। सान्निध्यं सर्व
दा देव लिंगेस्मिन्परिकल्पय। ततो रत्नोदकुकलशेनाभिषिंचति
प्रणवेन कूर्चासनं दत्वा। दूर्वा विष्णुक्रांता श्यामा कपद्मपत्र क
लशेन पाद्यं। इमा आपः शिवतमा पूताः पूततमा मेध्या मेध्यत
मा अमृता अमृतरसाः पाद्यास्ताञ्जुषतां प्रतिगृह्यतां प्रतिग
ह्यतां प्रतिगृह्णातु भवान्महादेवो रुद्राय वै नमो नम इति इ
पाद्यं दत्वा। आपः क्षीरकुशाग्रैः अक्षतैः यवैस्तिलैः दूर्वाभिः
अर्घ्यं। इमा आपः शि० रसाः अर्घ्यास्तांजुषं० नम इति अर्घ्यं
दत्वा। एलालवंगाकर्पूरमिश्रोदकेनाचमनं। इमा० रसाः आ
चमनीयास्तांजुषं० नम इत्याचमनीयं दत्वा। स्नानपर्यंतमा
वृतिः। नमो अस्तु नीलग्रीवाय इति प्रतिसरं विसृस्यानमस्कृ
त्य। इमे गंधाः शुभा दिव्याः सर्वगंधैरलंकृताः। पूता ब्रह्मप
वित्रेण पूताः सूर्यस्य रश्मिभिः। प्रतिगृह्यतां प्रतिगृह्णातु भ
वान्महादेवो रुद्राय वै नमो नमः। इति गंधं दत्वा इमे माल्या
शुभा दिव्याः सर्वपुष्पैरलंकृताः। पूता ब्रह्मपवित्रेण० नमो न
म इति पुष्पाणि दत्वा। वनस्पतिरसो० नमो नमः इति धूपं दत्वा
ज्योतिः शुक्रश्च तेजश्च देवानां सततं प्रियः। प्रभाकर महातेजो
दीपोयं प्रतिगृह्यतां प्रतिगृह्णातु भवा० नम इति दीपं दत्वा। प
रमान्नेन गुडोदनेनाज्योदनेन नाभक्ष्योपहारादीनां। पवित्रं ते

वितत्तमितिनैवेद्यं। तांवूलं दक्षिणां नीराजनं च कृत्वा। पुष्पांजलिं गृहीत्वा। भवायदेवयनमः शर्वायदेवाय० ईशानायदेवाय० पशुपतयेनमः रुद्रायदेवाय० उग्रायदेवाय० भीमायदेवाय० महतेदेवाय० एभिः पुष्पांजलिं दत्वा नैरेवत्तर्पणं कृत्वा। भवायदेवायनमस्वाहा। इत्यष्टभिर्नाममंत्रैस्तिलौदनेनहुत्वा। भवस्यदेवस्यपत्न्यैनमस्वाहा॥ इत्यभिर्मुडौदनेनहुत्वा। भवस्यदेवस्यसुतायनमस्वाहा। इत्यष्टभिर्हरिद्रौदनहुत्वा। त्रीणिहवींष्येकीकृत्यजुहुयात्। त्र्यंवकं यजामहेसुगंधिंपुष्टिवर्द्धनं उर्वारुकमिव वंधनान्मृत्योर्मुक्षीयमामृतात्स्वाहा॥ मानोमहांतं रुद्रीरिषः १ स्वाहा। २ मानस्तोकेतनये० विधेमतेस्वाहा। ३ आरात्तेगोघ्न० हूविर्हस्वाहा। ४ विकिरिदधिविलोहिन० पंतुत्तास्वाहा। ५ सहस्राणिसहस्रद्दशोये० तन्मसिस्वाहा। ६ शंकरायनमस्वाहा ७ शिवायनमस्वाहा। ८ सहमानायनमः स्वाहा। ९ शितिकंठाय नमस्वाहा। १० कपर्दिनेनमस्वाहा। ११ ताम्रायनमः स्वाहा। १२ अरुणायनमः स्वाहा। १३ अपगुरमायनमस्वाहा। १४ हिरण्य वाहवेनमस्वाहा। १५ ससिंजरायनमस्वाहा। १६ वभ्लुशायनमः स्वाहा। १७ हिरण्यायनमः स्वाहा। १८ इत्यष्टादशाहुतीर्हुत्वा स्विष्टकृदादिहोमशेषंसमाप्य। हविः शेषेणाद्वैन देवस्यहविः वलिर्देयः तत्रमंत्रः। त्वामेकमाद्यंपुरुषंप्रमाणं रुद्रं शिवं विश्वसृजं यजामहे त्वमेवयज्ञो विहितो विधेयस्त्वमात्मना त्वमस्प्रतिगृह्णीष्वहमं भूर्भुवः स्वःवरोऽद्दनित्रिहत्वा वलिमुपहरेत्। ततः आचम्य। अथयग्रेण

गिनमस्कृत्य पर्णेषु हुतशेषं निदधाति। भूर्भुवः स्वरोम् इति त्रिहुत्वा बलिमुपहरेत्। अग्नेनयेत्स्वग्नेः प्रदक्षिणीकृत्य। विश्वभुजे नमः। सर्वभुजे नमः। आत्मने नमः। परमात्मने नमः। इति नमस्कृत्य देवं प्रणिपत्य प्रार्थयेत्। यावच्चंद्रार्यवनी स्युर्यावत्तिष्ठंत्यप्रतिघातिनः तावत्त्वमत्र देवेश स्वेच्छया भक्तानुकंपया। इति संप्रार्थ्य। ततो नामकरणं। स्वनाम्ना स्थापयेल्लिंगं वारणस्य प्रयत्नतः। यन्नाम्ना स्थापयेल्लिंगं तन्नयेद्ब्रह्मशाश्वतमिति संग्रहे। तन्नाम्ना देवस्य त्वपुरस्ताद्यभिषेकैः नानाद्रव्योपचारैर्महापूजां कुर्यात्। कृतस्य लिंगप्रतिष्ठाकर्मणः सांगतासिध्यर्थं आचार्याय गोनिष्क्रयभूतं द्रव्यं आचार्याय तुभ्यमहं संप्रददे। कृतस्य लिंगप्रतिष्ठाकर्मणः सांगतासिध्यर्थं ब्रह्मणे अनडुह निष्क्रयभूतं द्रव्यं ब्रह्मणे तुभ्यमहं संप्रददे। कृतस्य लिंगप्रतिष्ठाकर्मणः सांगतासिध्यर्थं सदस्याय अश्वनिष्क्रयभूतं द्रव्यं सदस्याय तुभ्यमहं संप्रददे। कृतस्य लिंगप्रतिष्ठाकर्मणः सांगतासिध्यर्थं ऋत्विग्भ्यो यथाशक्ति दक्षिणां तुभ्यमहं संप्रददे। कृतस्य लिंगप्रतिष्ठाकर्मणः सांगतासिध्यर्थं पंचाश ब्राह्मणभोज्या लिंगस्थापनकर्मणि। तदर्द्धं वा भोजयेत्स्वशक्तितः। इति ब्राह्मणान्भोजयिष्ये। कृतस्य। लिंगप्रतिष्ठापनकर्मणः सांगतासिध्यर्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यः यथाशक्ति भूयसीं दक्षिणां दातुमहमुत्सृज्ये। मंडपदेवतां गिंच विसृज्य। यस्य स्मृत्या० विष्णुस्मरणं च। कर्म सम्पूर्णतां वाचयित्वा। इति संक्षेपेण लिंगप्रतिष्ठाविधिः॥ अथ सूत्रम्॥ ॥

नरणीवितभृगुभास्करिचंद्रमाकुजसुतेज्यविधुंतुदकेतवः र
विभतोदिनभंगणयेत्क्रमात्प्रतिखगंत्रितयंत्रितयंन्यसेत्
तीनसूनसूर्यमहानक्षत्रायासन।नित्सनक्षत्रपर्यंतमोजात्री।
मोजाचेभुमानरसैकातिथिवारभूताकृतासाशेषगुणोभ्रमुवि
वन्हीवामसैोख्यायहोमेशषीयुग्मशेषेप्राणाथेन्नाशोदेवीभुल
लेच॥ ॥भुक्तमसिज्यो निरसितेजोसिदेवःसवितापुनात्वच्छि
द्रेणपवित्रेणवसोसूर्यस्यरश्मिभिः॥ ॥शंभोमध्यगतेहरीनहरा
भूदेव्योहरौशंकरेभास्येनागसुताःरवौहरगणेशाजांबिकाःस्था
पिताःदेव्याविष्णुहरैकदंतरवयोलंबोदरेजेश्वरैनार्याःशंकर
भागतेतिशुभदान्यस्तास्तुतेहानिदा॥ नवग्रहासमिधात्र्प्रर्क
मंदारपालाशखदीरअपामार्गेपिपल१उदुंबरगुलरशमीदू
र्वाकुश॰॥पंचपल्लवन्यग्रोधपरअश्वथपाकरपरकदजावुल
अचुतआप ॥हयघोडगजहस्तिवारुल्लहृदगांगहजगोष्टगा
यरातहूारचतुशषयमसम्भतिः॥वायुवरअवशायनावर्दैका
जायपत्रमास मीसीरीपैसा।आसाचेसमागोलीकरानपः
अल्लादेपलादः।काशीखंडे।नगन्हास्तोरयकृतादोषोविश्वेश्वरा
लये।त्रिस्थलीसेतौवायवीये।गोदावर्यांगयायांचश्रीशैलेग्रह
णाद्वये।सुरासुरगृहणांचमोघदोषोनविद्यतेति॥ ९ ॥ ॥

३.

हरि		सूर्य
	शंभूः	
देवी		गणेश

२.

विष्णु		सो०
	देवी	
सूर्य		गणेश

शिव		गणेश
	हरिः	
देवी		सूर्य

शिव		गणेश
	सूर्य	
देवि		विष्णु

विष्णुः		शीव
	गणेश	
देवि		सूर्य

पतिपदैंपरमहंसातिरिक्तिपरं।तस्यकर्मस्यनधिकारः इदस्थला
चशिवसर्वस्वेभविष्याचतुर्वेदौस्तथाविष्णुःप्रतिष्ठाप्यःसुखा

थिभिः ब्राह्मणैः क्षत्रिये श्वपि लिंगस्थापनं प्रयत्नतः। चतुर्वेदौ रिति ग्रहणं द्विप्रादि प्रतिष्ठायां शूद्रस्य विकल्पः। लिंगस्थापनं ब्राह्मण द्वारा। भवतीति कल्पतरौ। १०। अपत्नेन। धूः। काश्यपाकृत पापस्य यार्थमाघानां गृहदानं अनाघानां शिवलिंगस्थापनमुक्तं काशीस्थचंद्रिकायां। ११। यजमान शालो यमाचार्यमित्युक्तं शांतिमयूखे। १२। ब्रह्मवैवर्ते देव्युवाच। देवदेव महादेव संदेहो नास्ति तत्त्वया। किंचित्कष्टमसीह ञायश्चित्तं विनिर्णयं पंगवा शक्तिरहिता रोगग्रस्ता घनैर्दीनाः काश्यं पापकृतः प्रायश्चित्तमभीप्सवः। कथं तेषां भवेच्छुद्धिर्धनिनां कामिनां सिनां सुकुमारशरीराणां। एतांस्तोसमवापिनां। वदं तेषां यथा शुद्धिर्यातनना विनिकृंतिनां। महादेव उवाच। शृणु देवि रहस्यं मे धर्मसूक्ष्मो भवेत्तदा। गदापूर्णी कस्तूरातमा खवाटवेलावसुजपीडारो। लवंगा सातवाटुन पिवावेदुरधूडु यास अशपी हशी पाशुलीपोली वाधानीनी च हमः हा। वौ द्वीव टा ण्ड ॥ ॥

इति लिंगप्रतिष्ठासमाप्ता॥ ॥ ॥ ॥

श्रीगणेशायनमः॥ अथाशौचनिर्णयेः। आचतुर्थ्यादूर्ध्वं स्त्राव पातः पंचमषष्ठयोः अतऊर्ध्वं प्रसूतिः स्यादिति तत्र स्त्रावे आद्ये मासत्रये मातुस्त्रिरात्रमाशौचं उपरि आषष्ठमासं स्यादिनमाशौचं चतुर्थे चत्वारि पंचमे पंच षष्ठे षडित्यर्थः सपिंडानां स्नानमात्रेणशुद्धिः आवपाते तु त्रिरात्रं सप्तममासप्रभृति तु सजातमृते दशाहादि सपिंडानां मातुश्च माधवस्मृति कारमतिरिक्तानां सप्तमे सप्तरात्रं अष्टमे अष्टरात्रं नवमप्रभृ

तितुदशरात्रमित्याहजन्माशौचमध्येशिशुमरणेमृताशौचं॥
नास्त्येवजन्मनिमित्तकमेवाशौचंनिष्क्राणनिर्गमनेप्येवंनाल
छेदनानंतरमरणेतुसपिंडानांपितुश्चत्रिरात्रयमेवसूतकंमातु
स्तुसंपूर्णदशाहमेवनालछेदनानंतरमरणेतुसंपूर्णदशाहादपरि
नामकरणात्पूर्वंशिशुमरणेनिखननमेवनाग्न्युदकदानंज्ञा
तीनांसचैलस्नानात्सद्यःशुद्धिःनामकरणानंतरंज्ञातीनामेका
हं अनुगमनंतुकृताकृतंखननपक्षेतुसद्यःशुद्धिःदंतजनना
दूर्ध्वमपित्रिवर्षपर्यंतमकृतचूडस्यखननदाहनयोर्विकल्पःख
ननेएकाहमाशौचदहनेत्रिरात्रं अत्रअग्निदर्पणमनुगमनंकृता
कृतंपश्चान्निसंकृतचूडस्यवामरणेतुगमनेदहनंत्रिरात्रमाशौचं
नियतमेवमातापित्रोस्त्वनुपनीतशिशुमरणेखननदहनयोरवि
शेषणत्रिरात्रं स्त्रीमरणेतुविशेषःत्रिपुरुषपर्यंतंज्ञातीनां
माचौलात्सद्यःशुद्धिःततोवाग्दानाद्वागेकाहमाशौच ततोविवा
हादर्वाक्पतिपक्षेपितृपक्षेचत्र्यहपित्रोस्त्वजातदंतासुकन्या
स्वेकाहःततःत्र्यहंसंस्कृतास्वपिपितृगेहेमृतासूपित्र्यहमिति
माधवःअन्येतुप्रदानमरणेपित्र्यहमाहुःपितृव्यादीनात्वेका
हमेवपितुर्गेहेकन्यायाःप्रसवेपित्रोरेकाहःमाधवस्तुपितुर्गेहे
कन्यायाप्रसवमरणयोःपित्रोस्त्रिरात्रमेवपितृव्यादीनामेकरा
त्रमित्याहसपिंडजननेउपनीतसपिंडमरणेब्राह्मणस्यदशाहं
क्षत्रियस्यद्वादशाहंवैश्यस्यपंचदशाहंशूद्रस्यमासंसच्छूद्रस्य
पक्षंकूटस्थपारभ्यसप्तपुरुषाःसपिंडाःततःसप्तसमानोदका

नदुत्तरंगोत्रजाएवतत्रसमानोदकेउत्पन्नेउपनीतमृतेचत्रि
रात्रंगोत्रजेतुस्नानाच्छुद्धितत्रजननाशौचंदशाहादुपरिजन
नज्ञानेनास्येवतत्रापिपितुःस्नानमेवमृताशौचेतुदशाहादुपरि
मासत्रयात्पूर्वंमरणज्ञानेत्रिरात्रंततआषष्टंपक्षिणीततआ
नवममहःततस्नानोदकदानाभ्यांसद्यःशुद्धिरावर्षंवर्षादर्ध्वं
त्वास्लवमात्रंइदंचसर्वंविज्ञानेश्वराद्यनुरोधेनोक्तंमाधवमते
तेतुत्रिपक्षादर्वाक्त्र्यहंततआषण्मासंपक्षिणीततआव
र्षादहोरात्रंतदूर्ध्वंस्नानोदकदानेइतिवोढव्यंएतच्चत्रिरादि
कंसमानदेशएवादिशांतरेतुस्नानमेवेतिविज्ञानेश्वरादयःमा
धवस्तुदेशांतरेपिसपिंडमरणेत्र्यहंसद्यःशौचंतुसमानोदक
मरणविषयमित्याहदशादर्घवच्छिन्नोयःस्वाशौचकालःत
न्मध्येद्वितीयादिदिवसेजननमरणयोःश्रवणेतुअवशिष्टैरेव
दिवसैःशुद्धिःप्रत्यहयोजनद्वयंगच्छन्तुरुषाःयत्रमृतस्यवार्ता
माशौचकालमध्येमापयितुंनक्रोनीतदेशांतरंतयाचविप्रस्य
दशाहाशौचिनःविंशतियोजनैर्देशान्तरंक्षत्रियस्यद्वादशा
हाशौचिनिर्णयश्चतुर्विंशतियोजनैरैत्यादितथाएकाहपक्षि
णीत्रिरात्राशौचेषुद्धिवतुःषड्योजनरूपदेशांतराणियोज्यानि
मातापितृमरणेविशेषःपितरौचमृतौस्यातांदूरस्थोपिहिपुत्रकः
श्रुत्वातद्दिनमारभ्यदशाहंसूतकीभवेत्॥मातुःसपत्न्यांतुत्रिरा
त्रंइदंचहीनवर्णायमित्याहुःमातापितृमरणेदशाहमित्युपक्र
म्यस्त्रीपुरुषयोःपरस्परंचैवमसवर्णातमसपत्नीसुचेतिस्मृत्य

र्थेस्मारोतेइतिसगोत्राशौचप्रकरणंपित्रोरूपरमेगूढकन्यानां
त्रिरात्रंऋत्विजोदौहित्रेसहाध्यायिनीवंधुत्रयेश्रंतेवासिनिश्व
शुरेसत्रश्वांमित्रेभगन्यांभगिनेयेमानामहेपिपितृष्वसरिमातृष्वस
रिमातुलेमातुलान्यांपक्षिणीयत्रपक्षिणपाशौचंतत्रचतुर्योज
नरूपदेशांतरेस्नानंग्रामान्तरेलेकाहःएवंत्रिरात्राशौचेषट्यो
जनरूपदेशान्तरेस्नानंग्रामान्तरेपक्षिणितथैवएकाहाशौचे
द्वियोजनरूपदेशान्तरेस्नानंग्रामान्तरेपिस्नानमेववंधुत्रयंतु
आत्मपितृष्वसुःपुत्राआत्ममातृष्वसुःसुताःआत्ममातुलपुत्राश्च
विज्ञेयाआत्मबांधवाःपितुःपितृष्वसुःपुत्राःपितुर्मातृष्वसुःसुताः
पितुर्मातुलपुत्राश्चविज्ञायाआत्मबांधवाःमातुःपितृष्वसुःपुत्राः
मातुर्मातृष्वसुःसुताःमातुर्मातुलपुत्राश्चविज्ञेयामातृबांधवाःप
क्षिणीशब्दार्थस्तुदिवामरणेतदह अतरात्रिःपरेद्युश्चरात्रि
मरणेतुसारात्रिःअपरेद्युरहोरात्रंचेतिहरदत्तोक्तेःआगामिव
र्तमानाहर्युक्तायांनिशिपक्षिणीसमरकोशमारव्यायांक्षीर
स्वामिनाप्युक्तंपक्षोविपक्षोपूर्वोत्तरदिवसौतन्मध्यवर्त्ति
नीरात्रिःपक्षिणीनिशामध्यगोदिवसोप्येवमेवयाज्ञवल्क्य
स्तुगुरवेवनेवासिन्यनूचानमातुलश्रोत्रियेषुचेसेकरात्रमाहते
षांसपिंडस्यापियद्गृहेमरणंतद्गृहस्वामिनस्त्रिरात्रमितिसंगि
रःएकरात्रमितिविज्ञःतथाबृहस्पतिःअहंमातामहाचार्य
श्रोत्रियेषुशुचिर्भवेतप्रचेताःमातृष्वसामातुलयोःश्वश्रूश्व
शुरयोर्गुरौ॥मृतेचर्त्विजियाज्येचत्रिरात्रेणविशुध्यतीतिवसिष्ठः

असंस्कृते पक्षिणी रात्रिर्दौहित्रे भगिनीसुते संस्कृते तु त्रिरात्रं
स्यादिति वसिष्ठः ॥ आचार्यातत्पत्नीतत्पुत्रोपाध्यायमातुल
श्वशुरश्वशुर्य्यश्वार्घ्यसहाध्यायिशिष्येष्वतीतेष्वेकरात्रेणेत्या
दि एतेषां लघुकल्पाराणां सन्निध्यसन्निधिगुणावद्दुपकर्त्रेमनुप
कर्तृभेदेन व्यवस्थेत्याह : एतस्माचार्यादिमरणे त्रिरात्रादिकम
नस्मिन्दाहकर्त्तरि दाहकर्तेषु दशाहमेव देशाधिपतौ तु दिनंरा
त्रि मृते रात्रिः मानुषास्थिसरसे बुद्धिपूर्वं स्पृष्ट्वा त्रिरात्रं विरसे तु दि
नं अबुद्ध्यातु सरसे स्पृष्टे स्नानं विरसे त्वाचमनं अमानुषास्थि
स्पर्शे तु सस्नेहे स्नानं आशौच्यन्नमनापदि सकृद्भुक्ते यस्मिन्दि
ने भुक्तं तन्नाव शिष्टाहान्याशौचं असकृद्बुद्धिपूर्वं भुक्तेपि एतदेवाशौ
चं प्रायश्चित्तपरं विशेषः आपदि तु बुद्धिपूर्वं भोजनेपि दिनमाशौ
च सजातीयस्योत्कृष्टजातीयस्य वानुगमने सचेलं स्नानं घृत
प्राशनं च ब्राह्मणस्य क्षत्रियानुगमने त्वहोरात्रं क्षत्रियस्य वै
श्यानुगमनेप्येवं शूद्रानुगमने पक्षिणी ब्राह्मणस्य शूद्रानुग
मने त्रिरात्रं पराशरः प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्लभः
अनुगच्छेन्नीयमानं स त्रिरात्रेण शुध्यति धर्मार्थं ब्राह्मणनिर्हर
णे तु पदे पदेश्वमेधफलं अवगाहनात्सद्यः शौचं च त्रिरात्रं
तु ततश्चीर्णे नदीं गत्वा समुद्रगां प्राणायामशतं कृत्वा घृतं प्रा
विशुध्यति स्नेहादीनां तु शवं निर्हृत्य सदीयमन्नमश्नातः
गृहेणः च वसतो दशाहेन शुद्धिः तद्गृहेवासमात्रे त्रिरात्रं पक्वान्न
दीयमन्नमश्नतां तिन गृहे वसतां तस्यैकाहः ब्रह्मचारिणस्त्वपि

तद्व्यतिरिक्तशवनिर्हरणे व्रतलोपः मातापितृनिर्हरणेप्याशौ
चिनामन्त्रं ब्रह्मचारी नाश्नीयात्तैः सह न संविशेच्च सूतके चर्ते मा
ने तु द्वितीयं सूतकं यदि पूर्वेणैव शुध्येन जातं मृते मृतं मृतजातक
योगे तु या शुद्धिः स निर्गच्छते मृतेन शुद्ध्यते जातं न मृतं केन तु अन
त्रापि शावेनैव शुध्यते स्मृतिवशाधिनियदा तु पूर्वापेक्षया अधि
ककालव्यापि द्वितीयमापतति यथा त्रिरात्रे प्रक्रान्ते दशाहं त
त्र पूर्वशेषेण शुद्धिर्नास्ति यदि तु पूर्वप्रवृत्तमाशौचकालादधो
धिककालं स्यात्तदा पूर्वेणैवोत्तरसिद्धिः तद्यथा गर्भपातनिमि
त्ते षडहाशौचमध्ये यदि दशाहाशौचमापद्येत तदा षडहाशौ
चशेषेणैव दशाहाशौचशुद्धिः अत्र विशेषमाह गौतमः रात्रिशे
षे द्वाभ्यां प्रभाते तिसृभिरिति रात्रिमात्रशेषे पूर्वाशौचे यद्याशौचा
न्तरं तर्हि पूर्वाशौचं समाप्यानन्तराभ्यां रात्रिभ्यां शुद्धिः तस्या एव
रात्रेः पश्चिमे यामे त्वाशौचे तिसृभिः शुद्धिर्न तु तच्छेषमात्रेणे
ति विज्ञानेश्वरः माधवस्तु नवमे दिवसे पूर्णे यद्याशौचान्तरं त
दा पूर्वाशौचकालानन्तरं द्वाभ्यां रात्रिभ्यां शुद्धिः प्रभाते इति तु
प्रागवदित्याह हरदत्तस्तु पूर्वस्मिन्नाशौचे रात्रिशेषे सति य
द्यन्यदापद्येत तदा द्वाभ्यां शुद्धिः सा रात्रिः परेद्युश्चेत्यर्थः प्रभा
ते तिसृभिरिति अथ दशाहादौ व्यतीते परेद्युः प्रभाते संगवे
यद्यन्यदापद्येत तस्मिन्निस्रात्रिभिरिति पित्राशौचमध्ये
मातरि मृतायां पूर्वाशौचं समाप्य पक्षिणीमधिकां कुर्यात् मा
त्राशौचमध्ये पितृमरणे तु पित्राशौचं पूर्णमात्स्यैव यदि तु पि

त्राशौचे रात्रिशेषे वा माता म्रियते तदा पक्षिणी ह्यह्येयार्वैक
ल्पइतिके चित् इह एवेत्यपरे अशौचनिषेधः नकश्चयमा
पद्येतेतिशास्त्रमुक्तं अमहानदीतं रत्यो म्रियते तस्य दाहा
शौचादिनकार्यं संवत्सरे नं ततरं नारायणबलिं कृत्वा सर्वमौ
र्ध्वदैहिकं कार्यमेव सर्पहननं सौवर्णनागं प्रसक्तां गांच द
द्यादित्यधिकं प्रमादमरणेत्वाशौचादिकमस्त्येव तथा चां
गिरा यदि कश्चित्प्रमादेन म्रियताग्न्युदकादिभिः तस्याशौ
चं विधातव्यं कर्त्तव्या चोदकक्रिया इति वैधमरणे तु विशेष
माह शातातपः वृद्धः शौचक्रियालुप्तः प्रत्याख्यातभिषक्क्रियः
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः तस्य त्रिरात्रमा
शौचं द्वितीये त्वस्थिसंचयः तृतीये तूदकं दत्वा चतुर्थे श्राद्ध
माचरेदिति इदं चाशौचमाहिताग्नेः परमे संस्कारदिवसप्रभृ
ति कर्त्तव्यं अनाहिताग्नेस्तु मरणदिवसप्रभृति सचयनं तु प्र
थमे न्हि इत्यादिना विहितं तूभयोरपि संस्कारदिवसप्रभृत्ये
व आहिताग्नौ पितरि देशांतरमृते तेन तत्पुत्रादीनामासंस्कारा
पक्रमादाशौचं नास्ति अनाहिताग्नेस्तु विधिवद्दाहाभावे त
दानीमाशौचग्रहणं वैकल्पिकं तत्र अगृहीताशौचानां संस्का
रकाले पुनस्त्र्यहं अगृहीताशौचानां पूर्णदशाहाद्येव पुत्राणा
पत्न्याश्चैवं व्यवस्था पत्नीसंस्कारे पत्युश्चैवं सपत्न्यो मिथश्चै
वं अगृहीताशौचानां सपिंडानां तु त्रिरात्रं गृहीताशौचानां स
पिंडानां उत्तराशौचं नास्त्येव आहिताग्नेस्तु प्रतिकृतिदाहे

सपिंडानांदशाहमेवइदंचाशौचंद्विविधंअस्पृश्यत्वप्रयोज
कंकर्मानधिकारितालक्षणंचपुत्रेजातेपितुस्नानस्पृश्यतामा
मातुर्दशाहंसपिंडानांत्वस्पृश्यतानास्त्येवकिंतुकर्मानधिकार
तामात्रंसूतिकातुपुत्रजननेसतिविंशतिरात्रंकर्मानर्हीकन्या
जननेतुमासंपुत्रजन्मदिवसेपितुर्दानादौवचनादधिकारः
तथाप्यशंखलिखितौकुमारप्रसवनाभ्यामच्छिन्नपादानप्र
तिग्रहादिचदोषस्तदहरिसेकइतिजन्मदिनादारभ्यदेवतापू
जायामपिप्रथमषष्ठदशमदिवसेषुवचनादधिकारइतिमृ
ताशौचेतुसर्वेषामस्पृश्यमोत्सर्गिकंशौचत्रिभागादूर्ध्वंतुस्पृ
श्याःयतीनांब्रह्मचारीचशौचंकानाशौचंसमावर्तनानंतरंत
प्राङ्मृतानांसपिंडानामुदकदानंकृत्वात्रिरात्रमात्रमाशौ
चंकुर्यादेवपित्रादिभ्यउदकदानादिकंकुर्वन्ब्रह्मचार्याशौच
मपिलभतेतदुक्तंत्रित्राहुष्कांतांतेवाचार्यकेभ्यानलतिल
होब्रह्मचारीनदुष्टाशौचइतिप्रक्रांतप्रायश्चित्तानामाशौचं
नास्तिपूर्वप्रवृत्तचौलोपनयनादिसंस्कारेषुप्रत्तदेवताप्रति
ष्ठाद्युत्सर्गादिष्वप्येवं इतिभट्टोजिभट्टाकृतआशौचनिर्णयः
समाप्तम् अहाशौचेपिकर्तव्यमाधर्मकादशाहनिअतीतवि
षयेसद्यःस्नाहोर्ध्वंवानदिष्यतइतिअंगिरःदशान्नरंमृतंश्रु
त्वानाशौचंचेत्कथंचनकालक्षयेपिकुर्वीतदाहकालेदिन
त्रयमितिप्रकृतिदहनेत्वग्निदत्वात्रिरात्रमितिविश्वादर्शे॥
अथद्वादशेहन्येवाराधनं॥तत्रासंभवेशुक्लद्वादश्यांकार्यं॥

द्वादश्यामर्थयेतिवक्ष्यमाणनागरखंडवचनात्॥ द्वादशेहस्य
संभवेत्रयोदश्यांद्विवाभ्याचारणंतत्प्रकारोनागरखंडे॥ द्वादश्या
हेमृताहेचआराधनमथाचरेत्॥ श्रीगुरुंतद्गुरुंचैवपरमेष्ठिगु
रुंतथा॥ परात्परगुरुंचैवकेशवादीन्वनामभिः॥ गुर्वर्थेचतुरो
विप्रान्केशवादींश्चशक्तितः॥ संपूज्यभोजयेदन्नैःसघृतैर्व्यंजना
दिभिः॥ द्वादश्यामथवाभुंक्तेसम्यगाराधनंचरेत्॥ इतिमृता
हेचेतिचकारात्षोडशश्राद्धकालेषु॥ प्रत्यब्दंप्रतिमासंचेतिपूर्वो
दाहृतवचनात्॥ गुर्वर्थेचतुरइति॥ गुरुपदघटितनामधेयार्थे
प्रतिनामधेयंयेकेकइतिचतुर्णामर्थेचतुरइति॥ प्रतिनाम
धेयमेकैकइति॥ चतुर्णामर्थेचतुरइतिवा॥ आद्यपक्षेगुर्वा
दिचतुष्टयार्थेषोडशद्वितीयेचत्वारइतिभेदाः॥ गुरुत्रयंतेप
रमेष्ठिगुरुंविहायादौविश्वरूपधराचार्यंततोगुर्वादित्रयं॥ त
तःकेशवादीत्येवंप्रकारउक्तोग्रंथांतरे॥ विश्वरूपधराचार्यंगुर्वा
दित्रयमेवच॥ केशवादींस्ततःभुंक्तेकृष्णसंकर्षणादिकानि
ति॥ अथाराधनप्रयोगः॥ उक्तकालमध्यान्हेशुचिःकृतम
ध्यान्हिकस्नानोगुर्वादिस्थानेप्रत्येकंचत्वारःअशक्तौप्रतिस्था
नमेकैकइतिवाकेशवादिषुप्रतिस्थानंद्वौद्वइति॥ अशक्तौ
सर्वत्रैकैकइतिवायथासामर्थ्यंपूर्वनिमंत्रितब्राह्मणान्षोड
शचरणानाहूयदेशकालौसंकीर्त्यश्रीपरमेश्वरप्रीत्यर्थंगुर्वाराध
नकरिष्ये॥ इतिसंकल्प्यनिमंत्रितब्राह्मणान्गुर्वाद्यर्थेश्रीगुरोः
स्थानेभवद्भिःक्षणःकर्तव्यइत्येवमादितत्तन्नामप्रक्षेपेणचतुरो
वृत्वाकेशवार्थेभवद्भिःक्षणःकरणीयइत्येवंतत्तन्नाम्नाद्वादर्थे

यथासामर्थ्यंब्राह्मणान्निमंत्रयेत्तत्‌गुर्वोदित्रयपक्षेप्रथमंवि॥
श्वरूपधराचार्यस्थानेस्मरण॥ततोगुर्वादित्रयार्थे॥ततःकेश
वाद्यर्थेपक्षेभेदेपूर्ववत्॥ततस्तान्सर्वान्प्राङ्मुखानुपवेश्यपु
रुषसूक्तेनप्रत्यृचनमोनारायणायेतिमंत्रसहितेनावाहना
दिषोडशोपचारैःपूजयेत्पाद्यकालेचतुरस्रंमंडलंगोमये
नकृत्वागंधाक्षतपुष्पतुलसीदलैरलंकृत्यतत्रप्राङ्मुखंद्वि
जपादौसंनिधाप्याक्षतगंधपुष्पतुलसीमिश्रंजलंएत्ता
वानस्येत्यृचाद्विजपादयोःक्षिप्त्वानमोस्त्वनंतायेत्याद्यैःपौरा
णैस्तत्पादौप्रक्षाल्यप्रक्षालितोदकंपात्रांतरेगृहीत्वातत्पा
दौसाक्षतगंधपुष्पैरभ्यर्च्यआनंदमानंदकरंप्रसन्नंज्ञान
स्वरूपंनिजबोधयुक्तं॥योगींद्रमीड्यंभवरोगवैद्यंश्रीमद्गुरुं
नित्यमहंनमामि॥इतिनमस्कुर्यात्॥एवंक्रमेणप्रतिविप्र
पाद्यंदत्वापात्रगृहीतपादप्रक्षालनोदकंतुलस्यादिमिश्रितं
कृत्वागंधादिभिस्तत्पात्रंपलंकृत्यदेवसंनिधौसंस्थाप्यासने
षूपविष्टान्पूर्वंधृतपवित्रंसत्त्काचम्यपुनःपवित्रेधारयेत्॥
ब्राह्मणानाचम्यद्विजान्गंधादिदीपांतोपचारैःस्नानवर्जितैर
भ्यर्च्यभोजनपात्रेषुशुभिघार्यपायसादिविशिष्टद्रव्यंसाज्यंप
रिवेष्यगायत्र्यासंप्रोक्ष्यपृथिवीतेपात्रमिदंविष्णुरित्येताभ्यां
प्रतिविप्रमुपस्पर्शयित्वातत्तद्देशेनसत्त्काॐतद्ब्रह्मेत्यनु
वाकंपठित्वाब्रह्मार्पणमित्यादिपौराणमंत्रांश्चजपित्वाआपो
शनप्रदानाद्युत्तरापोशनांतमविकृतंभोजनकालेचनारायण
णोपनिषदाद्योपनिषद्गानंश्रावयेत्॥सुतृप्तेषुउनरेणतत्रैसे

सनुवाकं पठित्वा ब्रह्मा जपित्वा उत्तरापोशनादि दत्वा। आचांतेषूपविष्टेषु तांबूलानि दत्वा गुर्वीं दधनां गभस्तितीर्थे पूजनमहं करिष्य इति संकल्प्य गोमयेन चतुरस्रं मंडलं कृत्वा रंगवल्यादिभिरलंकृत्य तन्मंडले धान्योपरि पादोदककलशं संस्थाप्य तत्र गंगादि सर्वतीर्थानि भावयित्वा पुरुषसूक्तेन प्रत्यृचं तीर्थराजायनम इत्यंतेन षोडशोपचारैरभ्यर्च्य तत्पात्रं शिरसि धृत्वा लोकः सरस्वत्यामंतीत्यनुवाकं भीषास्माद्वातः पवत इत्यनुवाकं जपित्वा हरिकीर्तनपरः सर्वसहर्षेन संकृत्वा तत्पात्रं पुनर्मंडले संस्थाप्य चंदनाक्षतपुष्पाणि पूजावशिष्टानि बंधुभिः सह स्वयं धारयित्वा विप्रान्दक्षिणीकृत्य॥ आनंदमानंदकरं प्र० ॥ गुरुर्ब्रह्मा गुरुर्विष्णुरित्यादि पौराणमंत्रैर्द्विजान्तीर्थराजं च नमस्कृत्य गुर्वर्थविप्रहस्ते पादोदकपात्रं दत्वा तदाज्ञया तद्दत्ततीर्थं मंत्रेण गृह्णीयात्। तत्र मंत्रः। अविद्यामूलशमनं सर्वपापप्रणाशनं॥ गुरुपादोदकं चित्रं संसारद्रुमनाशनं। पुत्रादिकामनायांतु। शोषणं पापपंकस्य दीपनं ज्ञानतेजसः॥ गुरुपादोदकं चित्रं पुत्रपौत्रप्रवर्धनं॥ इति मंत्रेण गृह्णीयात्॥ ततस्तान्पुनः प्रणम्य तानन्यांश्च दक्षिणादिभिः तोषयित्वा सन्मानपुरःसरं ताननुव्रज्य कर्मेश्वरार्पणं कृत्वा स्वयं बंधुभिः सह भुंजीत॥ एवमेव प्रतिमासं प्रत्यब्दं म. तत्तिथौ कुर्यात् द्वितीयादौ प्रत्यब्दं चेति॥ नागरखंडागमायीचारानुगृहीत आराधनं॥ ॥ ॥ ॥



